# shrIdurgAsahasranAmastotram

# શ્રીદુર્ગાસહસ્રનામસ્તોત્રમ્

## Document Information

Text title : durgAsahasranAmastotram 3

File name : durgAsahasranAmastotram.itx

Category : sahasranAma, devii, devI

Location : doc_devii

Transliterated by : Shree Devi Kumar

Proofread by : PSA Easwaran

Description/comments : Some call it Mahashulini divyasahasranAmastotram

Acknowledge-Permission: Mahaperiaval Trust

Latest update : July 2, 2017

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 3, 2023

*sanskritdocuments.org*

# શ્રીદુર્ગાસહસ્રનામસ્તોત્રમ્

ધ્યાનમ્ ।
 ૧. સિંહસ્થા શશિશેખરા મરકતપ્રખ્યૈશ્ચતુર્ભિર્ભુજૈઃ ।
શઙ્ખં ચક્રધનુઃ શરાંશ્ચ દધતી નેત્રૈસ્ત્રિભિઃ શોભિતા ॥

આમુક્તાઙ્ગદહારકઙ્કણરણત્કાઞ્ચી રણન્નૂપુરા ।
દુર્ગા દુર્ગતિહારિણી ભવતુ નો રત્નોલ્લસત્કુણ્ડલા ॥

 ૨. માતર્મે મધુકૈટભઘ્નિ મહિષપ્રાણાપહારોદ્યમે ।
હેલાનિર્જિતધૂમ્રલોચનવધે હે ચણ્ડમુણ્ડાર્દિનિ ॥

નિશ્શેષીકૃતરક્તબીજદનુજે નિત્યે નિશુમ્ભાપહે ।
શુમ્ભધ્વંસિનિ સંહરાશુ દુરિતં દુર્ગે નમસ્તેઽમ્બિકે ॥

 ૩. હેમપ્રખ્યામિન્દુખણ્ડાર્ધમૌલિમ્ ।
શઙ્ખારિષ્ટાભીતિહસ્તાં ત્રિણેત્રામ્ ॥

હેમાબ્જસ્થાં પીતવસ્ત્રાં પ્રસન્નામ્ ।
દેવીં દુર્ગાં દિવ્યરૂપાં નમામિ ॥

 ૪. ઉદ્યદ્વિદ્યુત્કરાલાકુલહરિગલસંસ્થારિશઙ્ખાસિખેટે-
ષ્વિષ્વાસાખ્યત્રિશૂલાનરિગણભયદા તર્જનીં સન્દધાના ।
ચર્માસ્યુત્તીર્ણદોર્ભિઃ પ્રહરણનિપુણાભિર્વૃતા કન્યકાભિઃ
દદ્યાત્કાર્શાનભીષ્ટાન્ ત્રિણયનલલિતા ચાપિ કાત્યાયની વઃ ॥

 ૫. અરિશઙ્ખકૃપાણખેટબાણાન્ સુધનુઃ શૂલકકર્તરીં તર્જનીં દધાના ।
ભજતાં મહિષોત્તમાઙ્ગસંસ્થા નવદૂર્વાસદૃશીશ્રિયેઽસ્તુ દુર્ગા ॥

ૐ શ્રીદુર્ગા ત્રિજગન્માતા શ્રીમત્કૈલાસવાસિની ।
હિમાચલગુહાકાન્તમાણિક્યમણિમણ્ડપા ॥ ૧॥

ગિરિદુર્ગા ગૌરહસ્તા ગણનાથવૃતાઙ્ગણા ।

કલ્પકારણ્યસંવીતમાલતીકુઞ્જમન્દિરા ॥ ૨॥

ધર્મસિંહાસનારૂઢા ડાકિન્યાદિ સમાશ્રિતા ।
સિદ્ધવિદ્યાધરામર્ત્યવધૂટીનિકરસ્તુતા ॥ ૩॥

ચિન્તામણિશિલાક્લૃપ્તદ્વારાવલિગૃહાન્તરા ।
કટાક્ષવીક્ષણાપેક્ષકમલાક્ષિસુરાઙ્ગના ॥ ૪॥

લીલાભાષણસંલોલકમલાસનવલ્લભા ।
યામલોપનિષન્મન્ત્રવિલપચ્છુકપુઙ્ગવા ॥ ૫॥

દૂર્વાદલશ્યામરૂપા દુર્વારમતવિહ્વલા ।
નવકોરકસમ્પત્શ્રીકલ્પકારણ્યકુન્તલા ॥ ૬॥

વેણીકૈતકબર્હાંશુવિજિતસ્મરપટ્ટસા ।
કચસીમન્તરેખાન્તલમ્બમાણિક્યલમ્બિકા ॥ ૭॥

પુષ્પબાણશરાલીઢઘનધમ્મિલ્લભૂષણા ।
ભાલચન્દ્રકલાપ્રાન્તસત્સુધાબિન્દુમૌક્તિકા ॥ ૮॥

ચૂલીકાદમ્બિનીશ્લિષ્ટચન્દ્રરેખાલલાટિકા ।
ચન્દ્રમણ્ડલસંયુક્તભૌમકુઙ્કુમરેખિકા ॥ ૯॥

કેશાભ્રમુક્તકોદણ્ડસદૃગ્ભ્રૂલતિકાઞ્ચિતા ।
મારચાપલસચ્છુભ્રમૃગનાભિવિશેષકા ॥ ૧૦॥

કર્ણપૂરિતકહ્લારાકાઙ્ક્ષિતાપાઙ્ગવીક્ષણા ।
ક્ષીરાશયોત્પલાકારવિલસત્કૃષ્ણતારકા ॥ ૧૧॥

નેત્રપઙ્કેરુહાન્તઃસ્થભ્રમદ્ભ્રમરતારકા ।
ગરલાવૃતકલ્લોલનિમેષાઞ્જનભાસુરા ॥ ૧૨॥

તીક્ષ્ણાગ્રધારપ્રદ્યુમ્નશસ્ત્રપ્રત્યસ્ત્રવીક્ષણા ।
મુખચન્દ્રસુધાપૂરલુઢન્મીનાભલોચના ॥ ૧૩॥

મૌક્તિકાવૃતતાટઙ્કમણ્ડલદ્વયમણ્ડિતા ।
કન્દર્પધ્વજતાકીર્ણમકરાઙ્કિતકુણ્ડલા ॥ ૧૪॥

કર્ણરત્નૌઘચિન્તાર્કકમનીયમુખામ્બુજા ।
કારુણ્યસ્યન્દિવદના કણ્ઠમૂલસુકુઙ્કુમા ॥ ૧૫॥

ઓષ્ઠબિમ્બફલામોદશુકતુણ્ડાભનાસિકા ।
તિલચમ્પકપુષ્પશ્રીનાસિકાભરણોજ્જ્વલા ॥ ૧૬॥

નાસાચમ્પકસંસ્રસ્તમધુબિન્દુકમૌક્તિકા ।
મુખપઙ્કજકિઞ્જલ્કમુક્તાજાલસુનાસિકા ॥ ૧૭॥

સાલુવેશમુખાસ્વાદલોલુપાધરપલ્લવા ।
રદનાંશનટીરઙ્ગપ્રસ્તાવનપટાધરા ॥ ૧૮॥

દન્તલક્ષ્મીગૃહદ્વારનીશારાંશ્વધરચ્છદા ।
વિદ્રુમાધરબાલાર્કમિશ્રસ્મેરાંશુકૌમુદી ॥ ૧૯॥

મન્ત્રબીજાઙ્કુરાકારદ્વિજાવલિવિરાજિતા ।
સલ્લાપલક્ષ્મીમાઙ્ગલ્યમૌક્તિકસ્રગ્રદાલયા ॥ ૨૦॥

તામ્બૂલસારસૌગન્ધિસકલામ્નાયતાલુકા ।
કર્ણલક્ષ્મીવિલાસાર્થમણિદર્પણગણ્ડભૂઃ ॥ ૨૧॥

કપોલમુકુલાક્રાન્તકર્ણતાટઙ્કદીધિતિઃ ।
મુખપદ્મરજસ્તૂલહરિદ્રાચૂર્ણમણ્ડિતા ॥ ૨૨॥

કણ્ઠાદર્શપ્રભાસાન્દ્રવિજિતશ્રીવિરાજિતા ।
દેશિકેશહૃદાનન્દસમ્પચ્ચિબુકપેટિકા ॥ ૨૩॥

શરભાધીશસમ્બદ્ધમાઙ્ગલ્યમણિકન્ધરા ।
કસ્તૂરીપઙ્કસઞ્જાતગલનાલમુખામ્બુજા ॥ ૨૪॥

લાવણ્યામ્ભોધિમધ્યસ્થશઙ્ખસન્નિભકન્ધરા ।
ગલશઙ્ખપ્રસૂતાંશુમુક્તાદામવિરાજિતા ॥ ૨૫॥

માલતીમલ્લિકાતુલ્યભુજદ્વયમનોહરા ।
કનકાઙ્ગદકેયૂરચ્છવિનિર્જિતભાસ્કરા ॥ ૨૬॥

પ્રકોષ્ઠવલયાક્રાન્તપરિવેષગ્રહદ્યુતિઃ ।
વલયદ્વયવૈડૂર્યજ્વાલાલીઢકરામ્બુજા ॥ ૨૭॥

બાહુદ્વયલતાગ્રસ્તપલ્લવાભકરાઙ્ગુલિઃ ।
કરપઙ્કેરુહભ્રામ્યદ્રવિમણ્ડલકઙ્કણા ॥ ૨૮॥

અઙ્ગુલીવિદ્રુમલતાપર્વસ્વર્ણાઙ્ગુલીયકા ।
ભાગ્યપ્રદકરાન્તસ્થશઙ્ખચક્રાઙ્કમુદ્રિકા ॥ ૨૯॥

કરપદ્મદલપ્રાન્તભાસ્વદ્રત્નનખાઙ્કુરા ।
રત્નગ્રૈવેયહારાતિરમણીયકુચાન્તરા ॥ ૩૦॥

પ્રાલમ્બિકૌસ્તુભમણિપ્રભાલિપ્તસ્તનાન્તરા ।
શરભાધીશનેત્રાંશુકઞ્ચુકસ્તનમણ્ડલા ॥ ૩૧॥

રતીવિવાહકાલશ્રીપૂર્ણકુમ્ભસ્તનદ્વયા ।
અનઙ્ગજીવનપ્રાણમન્ત્રકુમ્ભસ્તનદ્વયા ॥ ૩૨॥

મધ્યવલ્લીપ્રાજ્યફલદ્વયવક્ષોજભાસુરા ।
સ્તનપર્વતપર્યન્તચિત્રકુઙ્કુમપત્રિકા ॥ ૩૩॥

ભ્રમરાલીઢરાજીવકુડ્મલસ્તનચૂચુકા ।
મહાશરભહૃદ્રાગરક્તવસ્ત્રોત્તરીયકા ॥ ૩૪॥

અનૌપમ્યાતિલાવણ્યપાર્ષ્ણિભાગાભિનન્દિતા ।
સ્તનસ્તબકરારાજદ્રોમવલ્લીતલોદરા ॥ ૩૫॥

કૃષ્ણરોમાવલીકૃષ્ણસપ્તપત્રોદરચ્છવિઃ ।
સૌન્દર્યપૂરસમ્પૂર્ણપ્રવાહાવર્તનાભિકા ॥ ૩૬॥

અનઙ્ગરસપૂરાબ્ધિતરઙ્ગાભવલિત્રયા ।
સન્ધ્યારુણાંશુકૌસુમ્ભપટાવૃતકટીતટી ॥ ૩૭॥

સપ્તકિઙ્કિણિકાશિઞ્જદ્રત્નકાન્તિકલાપિની ।
મેખલાદામસઙ્કીર્ણમયૂખાવૃતનીવિકા ॥ ૩૮॥

સુવર્ણસૂત્રાકલિતસૂક્ષ્મરત્નામ્બરાચલા ।
વીરેશ્વરાનઙ્ગસરિત્પુલિનીજઘનસ્થલા ॥ ૩૯॥

અસાદૃશ્યનિતમ્બશ્રીરમ્યરમ્ભોરુકાણ્ડયુક્ ।
હલમલ્લકનેત્રાભાવ્યાપ્તસન્ધિમનોહરા ॥ ૪૦॥

જાનુમણ્ડલધિક્કારિરાશિકૂટતટીકટી ।
સ્મરતૂણીરસઙ્કાશજઙ્ઘાદ્વિતયસુન્દરી ॥ ૪૧॥

ગુલ્ફદ્વિતયસૌભાગ્યજિતતાલફલદ્વયી ।
દ્યુમણિપ્રક્ષણાભાઙ્ઘ્રિયુગ્મનૂપુરમણ્ડલા ॥ ૪૨॥

રણદ્વલયસલ્લાપદ્રત્નમાલાભપાદુકા ।

પ્રપદાત્મકશસ્ત્રૌઘવિલસચ્ચર્મપુસ્તકા ॥ ૪૩॥

આધારકૂર્મપૃષ્ઠાભપાદપૃષ્ઠવિરાજિતા ।
પાદાઙ્ગુલિપ્રભાજાલપરાજિતદિવાકરા ॥ ૪૪॥

ચક્રચામરમત્સ્યાઙ્કચરણસ્થલપઙ્કજા ।
સુરેન્દ્રકોટિમુકુટીરત્નસઙ્ક્રાન્તપાદુકા ॥ ૪૫॥

અવ્યાજકરુણાગુમ્ફતનુરવ્યાજસુન્દરી ।
શ‍ૃઙ્ગારરસસામ્રાજ્યપદપટ્ટાભિષેચિતા ॥ ૪૬॥

શિવા ભવાની રુદ્રાણી શર્વાણી સર્વમઙ્ગલા ।
ઉમા કાત્યાયની ભદ્રા પાર્વતી પાવનાકૃતિઃ ॥ ૪૭॥

મૃડાની ચણ્ડિકા માતા રતિર્મઙ્ગલદેવતા ।
કાલી હૈમવતી વીરા કપાલશૂલધારિણી ॥ ૪૮॥

શરભા શામ્ભવી માયાતન્ત્રા તન્ત્રાર્થરૂપિણી ।
તરુણી ધર્મદા ધર્મતાપસી તારકાકૃતિઃ ॥ ૪૯॥

હરા મહેશ્વરી મુગ્ધા હંસિની હંસવાહના ।
ભાગ્યા બલકરી નિત્યા ભક્તિગમ્યા ભયાપહા ॥ ૫૦॥

માતઙ્ગી રસિકા મત્તા માલિની માલ્યધારિણી ।
મોહિની મુદિતા કૃષ્ણા મુક્તિદા મોદહર્ષિતા ॥ ૫૧॥

શ‍ૃઙ્ગારી શ્રીકરી શૂરજયિની જયશ‍ૃઙ્ખલા ।
સતી તારાત્મિકા તન્વી તારનાદા તડિત્પ્રભા ॥ ૫૨॥

અપર્ણા વિજયા નીલી રઞ્જિતા ત્વપરાજિતા ।
શઙ્કરી રમણી રામા શૈલેન્દ્રતનયા મહી ॥ ૫૩॥

બાલા સરસ્વતી લક્ષ્મીઃ પરમા પરદેવતા ।
ગાયત્રીરસિકા વિદ્યા ગઙ્ગા ગમ્ભીરવૈભવા ॥ ૫૪॥

દેવી દાક્ષાયણી દક્ષદમની દારુણપ્રભા ।
મારી મારકરી મૃષ્ટા મન્ત્રિણી મન્ત્રવિગ્રહા ॥ ૫૫॥

જ્વાલામયી પરારક્તા જ્વાલાક્ષી ધૂમ્રલોચના ।
વામા કુતૂહલા કુલ્યા કોમલા કુડ્મલસ્તની ॥ ૫૬॥

દણ્ડિની મુણ્ડિની ધીરા જયકન્યા જયઙ્કરી ।
ચામુણ્ડી ચણ્ડમુણ્ડેશી ચણ્ડમુણ્ડનિષૂદિની ॥ ૫૭॥

ભદ્રકાલી વહ્નિદુર્ગા પાલિતામરસૈનિકા ।
યોગિનીગણસંવીતા પ્રબલા હંસગામિની ॥ ૫૮॥

શુમ્ભાસુરપ્રાણહન્ત્રી સૂક્ષ્મા શોભનવિક્રમા ।
નિશુમ્ભવીર્યશમની નિર્નિદ્રા નિરુપપ્લવા ॥ ૫૯॥

ધર્મસિંહધૃતા માલી નારસિંહાઙ્ગલોલુપા ।
ભુજાષ્ટકયુતા તુઙ્ગા તુઙ્ગસિંહાસનેશ્વરી ॥ ૬૦॥

રાજરાજેશ્વરી જ્યોત્સ્ના રાજ્યસામ્રાજ્યદાયિની ।
મન્ત્રકેલિશુકાલાપા મહનીયા મહાશના ॥ ૬૧॥

દુર્વારકરુણાસિન્ધુર્ધૂમલા દુષ્ટનાશિની ।
વીરલક્ષ્મીર્વીરપૂજ્યા વીરવેષમહોત્સવા ॥ ૬૨॥

વનદુર્ગા વહ્નિહસ્તા વાઞ્છિતાર્થપ્રદાયિની ।
વનમાલી ચ વારાહી વાગાસારનિવાસિની ॥ ૬૩॥

એકાકિન્યેકસિંહસ્થા ચૈકદન્તપ્રસૂતિની ।
નૃસિંહચર્મવસના નિર્નિરીક્ષ્યા નિરઙ્કુશા ॥ ૬૪॥

નૃપાલવીર્યનિર્વેગા નીચગ્રામનિષૂદિની ।
સુદર્શનાસ્ત્રદર્પઘ્ની સોમખણ્ડાવતંસિકા ॥ ૬૫॥

પુલિન્દકુલસંસેવ્યા પુષ્પધુત્તૂરમાલિકા ।
ગુઞ્જામણિલસન્માલા શઙ્ખતાટઙ્કશોભિની ॥ ૬૬॥

માતઙ્ગમદસિન્દૂરતિલકા મધુવાસિની ।
પુલિન્દિનીશ્વરી શ્યામા ચલચેલકટિસ્થલા ॥ ૬૭॥

બર્હાવતંસધમ્મિલ્લા તમાલશ્યામલાકૃતિઃ ।
શત્રુસંહારશસ્ત્રાઙ્ગપાશકોદણ્ડધારિણી ॥ ૬૮॥

કઙ્કાલી નારસિંહાઙ્ગરક્તપાનસમુત્સુકા ।
વસામલિનવારાહદંષ્ટ્રા પ્રાલમ્બમાલિકા ॥ ૬૯॥

સન્ધ્યારુણજટાધારિકાલમેઘસમપ્રભા ।
ચતુર્મુખશિરોમાલા સર્પયજ્ઞોપવીતિની ॥ ૭૦॥

દક્ષયજ્ઞાનલધ્વંસદલિતામરડામ્ભિકા ।
વીરભદ્રામોદકરવીરાટોપવિહારિણી ॥ ૭૧॥

જલદુર્ગા મહામત્તદનુજપ્રાણભક્ષિણી ।
પરમન્ત્રભક્ષિવહ્નિજ્વાલાકીર્ણત્રિલોચના ॥ ૭૨॥

શત્રુશલ્યમયામોઘનાદનિર્ભિન્નદાનવા ।
રાક્ષસપ્રાણમથનવક્રદંષ્ટ્રા મહોજ્વલા ॥ ૭૩॥

ક્ષુદ્રગ્રહાપહા ક્ષુદ્રમન્ત્રતન્ત્રક્રિયાપહા ।
વ્યાઘ્રાજિનામ્બરધરા વ્યાલકઙ્કણભૂષણા ॥ ૭૪॥

બલિપૂજાપ્રિયક્ષુદ્રપૈશાચમદનાશિની ।
સમ્મોહનાસ્ત્રમન્ત્રાત્તદાનવૌઘવિનાશિની ॥ ૭૫॥

કામક્રાન્તમનોવૃત્તિઃ કામકેલિ કલારતા ।
કર્પૂરવીટિકાપ્રીતા કામિનીજનમોહિની ॥ ૭૬॥

સ્વપ્નવતી સ્વપ્નભોગા ધ્વંસિતાખિલદાનવા ।
આકર્ષણક્રિયાલોલા ચાશ્રિતાભીષ્ટદાયિની ॥ ૭૭॥

જ્વાલામુખી જ્વાલનેત્રા જ્વાલાઙ્ગા જ્વરનાશિની ।
શલ્યાકરી શલ્યહન્ત્રી શલ્યમન્ત્રચલાચલા ॥ ૭૮॥

ચતુર્થ્યકુહરા રૌદ્રી તાપઘ્ની દરનાશિની ।
દારિદ્ર્યશમની ક્રુધ્દા વ્યાધિની વ્યાધિનાશિની ॥ ૭૯॥

બ્રહ્મરક્ષોહરા બ્રાહ્મિગણહારી ગણેશ્વરી ।
આવેશગ્રહસંહારી હન્ત્રી મન્ત્રી હરિપ્રિયા ॥ ૮૦॥

કૃત્તિકા કૃત્તિહરણા ગૌરી ગમ્ભીરમાનસા ।
યુધ્દપ્રીતા યુધ્દકારી યોધ્દૃગણ્યા યુધિષ્ઠિરા ॥ ૮૧॥

તુષ્ટિદા પુષ્ટિદા પુણ્યભોગમોક્ષફલપ્રદા ।
અપાપા પાપશમની ત્વરૂપા રૂપદારુણા ॥ ૮૨॥

અન્નદા ધનદા પૂતા ત્વણિમાદિફલપ્રદા ।
સિધ્દિદા બુધ્દિદા શૂલા શિષ્ટાચારપરાયણા ॥ ૮૩॥

અમાયા હ્યમરારાધ્યા હંસમન્ત્રા હલાયુધા ।

ક્ષામપ્રધ્વંસિની ક્ષોભ્યા શાર્દૂલાસનવાસિની ॥ ૮૪॥

સત્ત્વરૂપા તમોહન્ત્રી સૌમ્યા સારઙ્ગભાવના ।
દ્વિસહસ્રકરા શુદ્ધા સ્થૂલસિંહસુવાસિની ॥ ૮૫॥

નારાયણી મહાવીર્યા નાદબિન્દ્વન્તરાત્મિકા ।
ષડ્ગુણા તત્ત્વનિલયા તત્ત્વાતીતાऽમૃતેશ્વરી ॥ ૮૬॥

સુરમૂર્તિઃ સુરારાધ્યા સુમુખા કાલરૂપિણી ।
સન્ધ્યારૂપા કાન્તિમતી ખેચરી ભુવનેશ્વરી ॥ ૮૭॥

મૂલપ્રકૃતિરવ્યક્તા મહામાયા મનોન્મની ।
જ્યેષ્ઠા વામા જગન્મૂલા સૃષ્ટિસંહારકારણા ॥ ૮૮॥

સ્વતન્ત્રા સ્વવશા લોકભોગદા સુરનન્દિની ।
ચિત્રાચિત્રાકૃતિશ્ચૈવ સચિત્રવસનપ્રિયા ॥ ૮૯॥

વિષાપહા વેદમન્ત્રા વેદવિદ્યાવિલાસિની ।
કુણ્ડલીકન્દનિલયા ગુહ્યા ગુહ્યકવન્દિતા ॥ ૯૦॥

કાલરાત્રી કલાનિષ્ઠા કૌમારી કામમોહિની ।
વશ્યાદિની વરારોહા વન્દારુજનવત્સલા ॥ ૯૧॥

સઞ્જ્વાલામાલિની શક્તિઃ સુરાપ્રીતા સુવાસિની ।
મહિષાસુરસંહારી મત્તમાતઙ્ગગામિની ॥ ૯૨॥

મદગન્ધિતમાતઙ્ગા વિદ્યુદ્દામાભિસુન્દરી ।
રક્તબીજાસુરધ્વંસી વીરપાણારુણેક્ષણા ॥ ૯૩॥

મહિષોત્તમસંરૂઢમાંસપ્રોતાયુતાઞ્ચલા ।
યશોવતી હેમકૂટતુઙ્ગશ◌ૃઙ્ગનિકેતના ॥ ૯૪॥

દાનકલ્પકસચ્છાયા સન્તાનાદિફલપ્રદા ।
આશ્રિતાભીષ્ટવરદા ચાખિલાગમગોપિતા ॥ ૯૫॥

દારિદ્ર્યશૈલદમ્ભોલિઃ ક્ષુદ્રપઙ્કજચન્દ્રિકા ।
રોગાન્ધકારચણ્ડાંશુઃ પાપદ્રુમકુઠારિકા ॥ ૯૬॥

ભવાટવીદાવવહ્નિશત્રુતૂલસ્ફુલિઙ્ગરુક્ ।
સ્ફોટકોરકમાયૂરી ક્ષુદ્રપ્રાણનિવારિણી ॥ ૯૭॥

અપસ્મારમૃગવ્યાઘ્રીચિત્તક્ષોભવિમોચિની ।
ક્ષયમાતઙ્ગપઞ્ચાસ્યા કૃચ્છ્રવર્ગાપહારિણી ॥ ૯૮॥

પીનસશ્વાસકાસઘ્ની પિશાચોપાધિમોચિની ।
વિવાદશમની લોકબાધાપઞ્ચકનાશિની ॥ ૯૯॥

અપવાદહરાસેવ્યા સઙ્ગ્રામવિજયપ્રદા ।
રક્તપિત્તગલવ્યાધિહરા હરવિમોહિની ॥ ૧૦૦॥

ક્ષુદ્રશલ્યમયા દાસકાર્યારમ્ભસમુત્સુકા ।
કુષ્ઠગુલ્મપ્રમેહઘ્ની ગૂઢશલ્યવિનાશિની ॥ ૧૦૧॥

ભક્તિમત્પ્રાણસૌહાર્દા સુહૃદ્વંશાભિવર્ધિકા ।
ઉપાસ્યા ચાખિલમ્લેચ્છમદમાનવિમોચની ॥ ૧૦૨॥

ભૈરવી ભીષણા ભીષા ભિન્નારાતિરણાઞ્ચલા ।
વ્યૂહધ્વંસી વીરહવ્યા વીર્યાત્મા વ્યૂહરક્ષિકા ॥ ૧૦૩॥

મહારાષ્ટ્રા મહાસેના માંસાશી માધવાનુજા ।
વ્યાઘ્રધ્વજા વજ્રનખી વજ્રી વ્યાઘ્રનિષૂદિની ॥ ૧૦૪॥

ખડ્ગિની કન્યકાવેષા કૌમારી ખડ્ગવાસિની ।
સઙ્ગ્રામવાસિન્યસ્તાસ્ત્રા ધીરજ્યાસાયકાસના ॥ ૧૦૫॥

કોદણ્ડધ્વનિકૃત્ક્રુદ્ધા ક્રૂરદૃષ્ટિભયાનકા ।
વીરાગ્રગામિની દુષ્ટાસન્તુષ્ટા શત્રુભક્ષિણી ॥ ૧૦૬॥

સન્ધ્યાટવીચરા વિત્તગોપના વિત્તકૃચ્ચલા ।
કૈટભાસુરસંહારી કાલી કલ્યાણકોમલા ॥ ૧૦૭॥

નન્દિની નન્દિચરિતા નરકાલયમોચના ।
મલયાચલશૃઙ્ગસ્થા ગન્ધિની સુરતાલસા ॥ ૧૦૮॥

કાદમ્બરી કાન્તિમતી કાન્તા કાદમ્બરાશના ।
મધુદાનવવિદ્રાવી મધુપા પાટલારુણા ॥ ૧૦૯॥

રાત્રિઞ્ચરા રાક્ષસઘ્ની રમ્યા રાત્રિસમર્ચિતા ।
શિવરાત્રિમહાપૂજ્યા દેવલોકવિહારિણી ॥ ૧૧૦॥

ધ્યાનાદિકાલસઞ્જપ્યા ભક્તસન્તાનભાગ્યદા ।
મધ્યાહ્નકાલસન્તર્પ્યા જયસંહારશૂલિની ॥ ૧૧૧॥

ત્રિયમ્બકા મખધ્વંસી ત્રિપુરા પુરશૂલિની ।
રઙ્ગસ્થા રઞ્જિની રઙ્ગા સિન્દૂરારુણશાલિની ॥ ૧૧૨॥

સુન્દોપસુન્દહન્ત્રી તુ સૂક્ષ્મા મોહનશૂલિની ।
અષ્ટમૂર્તિઃ કલાનાથા ચાષ્ટહસ્તા સુતપ્રદા ॥ ૧૧૩॥

અઙ્ગારકા કોપનાક્ષી હંસાસુરમદાપહા ।
આપીનસ્તનનમ્રાઙ્ગી હરિદ્રાલેપિતસ્તની ॥ ૧૧૪॥

ઇન્દ્રાક્ષી હેમસઙ્કાશા હેમવસ્ત્રા હરપ્રિયા ।
ઈશ્વરી ત્વિતિહાસાત્મા ઈતિબાધાનિવારિણી ॥ ૧૧૫॥

ઉપાસ્યા ચોન્મદાકારા હ્યુલ્લઙ્ઘિતસુરાપગા ।
ઊષરસ્થલકાસારા હ્યુત્પલશ્યામલાકૃતિઃ ॥ ૧૧૬॥

ઋઙ્મયી સામસઙ્ગીતા શુદ્ધિઃ કલ્પકવલ્લરી ।
સાયન્તનહુતિર્દાસકામધેનુસ્વરૂપિણી ॥ ૧૧૭॥

પઞ્ચદશાક્ષરીમન્ત્રા તારકાવૃતષોડશી ।
હ્રીઙ્કારનિષ્ઠા હ્રીઙ્કારહુઙ્કારી દુરિતાપહા ॥ ૧૧૮॥

ષડઙ્ગા નવકોણસ્થા ત્રિકોણા સર્વતોમુખી ।
સહસ્રવદના પદ્મા શૂલિની સુરપાલિની ॥ ૧૧૯॥

મહાશૂલધરા શક્તિર્માતા માહેન્દ્રપૂજિતા ।
શૂલદુર્ગા શૂલહરા શોભના ચૈવ શૂલિની ॥ ૧૨૦॥

શ્રીશૂલિની જગદ્બીજા મૂલાહઙ્કારશૂલિની ।
પ્રકાશા પરમાકાશા ભાવિતા વીરશૂલિની ॥ ૧૨૧॥

નારસિંહી મહેન્દ્રાણી સાલીશરભશૂલિની ।
ઋઙ્કાર્યૃતુમતી ચૈવાઘોરાડથર્વણગોપિકા ॥ ૧૨૨॥

ઘોરઘોરા જપારાગપ્રસૂનાઞ્ચિતમાલિકા ।
સુસ્વરૂપા સૌહૃદાઢ્યાલીઢા દાડિમપાટકા ॥ ૧૨૩॥

લયા ચ લમ્પટા લીના કુઙ્કુમારુણકન્ધરા ।
ઇકારાધ્યાત્વિલાનાથા ત્વિલાવૃતજનાવૃતા ॥ ૧૨૪॥

ઐશ્વર્યનિષ્ઠા હરિતા હરિતાલસમપ્રભા ।

મુદ્ગમાષાજ્યભોજ્યા ચ યુક્તાયુક્તભટાન્વિતા ॥ ૧૨૫॥

ઔત્સુકી ચાણિમદ્ગમ્યા ત્વખિલાણ્ડનિવાસિની ।
હંસમુક્તામણિશ્રેણિઃ હંસાખ્યા હાસકારિણી ॥ ૧૨૬॥

કલિદોષહરા ક્ષીરપાયિની વિપ્રપૂજિતા ।
ખટ્વાઙ્ગસ્થા ખડ્ગરૂપા ખબીજા ખરસૂદના ॥ ૧૨૭॥

આજ્યપાયિન્યસ્થિમાલા પાર્થિવારાધ્યપાદુકા ।
ગમ્ભીરનાભિકાસિદ્ધકિન્નરસ્ત્રી સમાવૃતા ॥ ૧૨૮॥

ખડ્ગાત્મિકા ઘનનિભા વૈશ્યાર્ચ્યા માક્ષિકપ્રિયા ।
મકારવર્ણા ગમ્ભીરા શૂદ્રાર્ચ્યા ચાસવપ્રિયા ॥ ૧૨૯॥

ચાતુરી પાર્વણારાધ્યા મુક્તાધાવલ્યરૂપિણી ।
છન્દોમયી ભૌમપૂજ્યા દુષ્ટશત્રુવિનાશિની ॥ ૧૩૦॥

જયિની ચાષ્ટમીસેવ્યા ક્રૂરહોમસમન્વિતા ।
ઝઙ્કારી નવમીપૂજ્યા લાઙ્ગલીકુસુમપ્રિયા ॥ ૧૩૧॥

સદા ચતુર્દશીપૂજ્યા ભક્તાનાં પુષ્ટિકારિણી ।
જ્ઞાનગમ્યા દર્શપૂજ્યા ડામરી રિપુમારિણી ॥ ૧૩૨॥

સત્યસઙ્કલ્પસંવેદ્યા કલિકાલસુસન્ધિકા ।
ડમ્ભાકારા કલ્પસિદ્ધા શલ્યકૌતુકવર્ધિની ॥ ૧૩૩॥

ઠાકૃતિઃ કવિવરારાધ્યા સર્વસમ્પત્પ્રદાયિકા ।
નવરાત્રિદિનારાધ્યા રાષ્ટ્રદા રાષ્ટ્રવર્ધિની ॥ ૧૩૪॥

પાનાસવમદધ્વંસિમૂલિકાસિદ્ધિદાયિની ।
ફલપ્રદા કુબેરાધ્યા પારિજાતપ્રસૂનભાક્ ॥ ૧૩૫॥

બલિમન્ત્રૌઘસંસિદ્ધા મન્ત્રચિન્ત્યફલાવહા ।
ભક્તિપ્રિયા ભક્તિગમ્યા કિઙ્કરા ભગમાલિની ॥ ૧૩૬॥

માધવી વિપિનાન્તસ્સ્થા મહતી મહિષાર્દિની ।
યજુર્વેદગતા શઙ્ખચક્રહસ્તામ્બુજદ્વયા ॥ ૧૩૭॥

રાજસા રાજમાતઙ્ગી રાકાચન્દ્રનિભાનના ।
લાઘવાલાઘવારાધ્યા રમણીજનમધ્યગા ॥ ૧૩૮॥

વાગીશ્વરી વકુલમાલ્યા વાઙ્મયી વારિતાસુખા ।
શરભાધીશવનિતા ચન્દ્રમણ્ડલમધ્યગા ॥ ૧૩૯॥

ષડધ્વાન્તરતારા ચ રક્તજુષ્ટાહુતાવહા ।
તત્ત્વજ્ઞાનાનન્દકલામયા સાયુજ્યસાધના ॥ ૧૪૦॥

કર્મસાધકસંલીનધનદર્શનદા સદા ।
હઙ્કારિકા સ્થાવરાત્મા ત્વમરીલાસ્યમોદના ॥ ૧૪૧॥

લકારત્રયસમ્ભૂતા લલિતા લક્ષ્મણાર્ચિતા ।
લક્ષ્મમૂર્તિસ્સદાહારા પ્રાસાદાવાસલોચના ॥ ૧૪૨॥

નીલકણ્ઠી હરિદ્રશ્મિઃ શુકી ગૌરી ચ ગોત્રજા ।
અપર્ણા યક્ષિણી યક્ષા હરિદ્રા હલિની હલી ॥ ૧૪૩॥

દદતી ચોર્મદા ચોર્મી રસા વિશ્વમ્ભરા સ્થિરા ।
પઞ્ચાસ્યા પઞ્ચમીરાગા ભાગ્યયોગાત્મિકામ્બિકા ॥ ૧૪૪॥

ગણિકા ચૈવ કાલી ચ વીણા શોણારુણાત્મિકા ।
રમાદૂતી કલાસિંહી લજ્જા ધૂમવતી જડા ॥ ૧૪૫॥

ભૃઙ્ગિસઙ્ગિસખી પીના સ્નેહારોગમનસ્વિની ।
રણીમૃડા દૃઢા જ્યેષ્ઠા રમણી યમુનારતા ॥ ૧૪૬॥

મુસલીકુણ્ઠિતામોટા ચણ્ડખણ્ડા ગણાબલા ।
શુક્લા સ્રષ્ટ્રીવશા જ્ઞાનિમાની લીલાલકા શચી ॥ ૧૪૭॥

સૂરચન્દ્રઘૃણિર્ઘોષાવીર્યાક્રીડા રસાવહા ।
નૂત્ના સોમા મહારાજ્ઞી ગયાયાગાહુતપ્રભા ॥ ૧૪૮॥

ધૂર્તા સુધાઘનાલીનપુષ્ટિમૃષ્ટસુધાકરા ।
કરિણી કામિની મુક્તામણિશ્રેણી ફણીશ્વરા ॥ ૧૪૯॥

તાર્ક્ષી સૂક્ષ્મા નતાચાર્યા ગૌરિકા ગિરિજાઙ્ગના ।
ઇન્દ્રજાલા ચેન્દુમુખીત્વિન્દ્રોપેન્દ્રાદિ સંસ્તુતા ॥ ૧૫૦॥

શિવદૂતી ચ ગરલશિતિકણ્ઠકુટુમ્બિની ।
જ્વલન્તીજ્વલનાકારા જ્વલજ્જાજ્વલ્યજમ્ભદા ॥ ૧૫૧॥

જ્વાલાશયા જ્વાલમણિર્જ્યોતિષાં ગતિરેવ હિ ।
જ્યોતિઃશાસ્ત્રાનુમેયાત્મા જ્યોતિષી જ્વલિતોજ્જ્વલા ॥ ૧૫૨॥

જ્યોતિષ્મતી દુર્ગવાસી જ્યોત્સ્નાભા જ્વલનાર્ચિતા ।
લઙ્કારી લલિતાવાસા લલિતાલલિતાત્મિકા ॥ ૧૫૩ ॥

લઙ્કાધિપા લાસ્યલોલા લયભોગમયાલયા ।
લાવણ્યશાલિની લોલા લાઙ્ગલા લલિતામ્બિકા ॥ ૧૫૪ ॥

લાઞ્છના લમ્પટાલઙ્ઘ્યા લકુલાર્ણવમુક્તિદા ।
લલાટનેત્રા લજ્જાઢ્યા લાસ્યાલાપમુદાકરા ॥ ૧૫૫ ॥

જ્વાલાકૃતિર્જ્વલદ્બીજા જ્યોતિર્મણ્ડલમધ્યગા ।
જ્યોતિસ્સ્તમ્ભા જ્વલદ્વીર્યા જ્વલન્મન્ત્રા જ્વલત્ફલા ॥ ૧૫૬ ॥

જુષિરા જુમ્પટા જ્યોતિર્માલિકા જ્યોતિકાસ્મિતા ।
જ્વલદ્વલયહસ્તાબ્જા જ્વલત્પ્રજ્વલકોજ્જ્વલા ॥ ૧૫૭ ॥

જ્વાલમાલ્યા જગજ્જ્વાલા જ્વલજ્જ્વલનસજ્જ્વલા ।
લમ્બીજા લેલિહાનાત્મા લીલાક્લિન્ના લયાવહા ॥ ૧૫૮ ॥

લજ્જાવતી લબ્ધપુત્રી લાકિની લોલકુણ્ડલા ।
લબ્ધભાગ્યા લબ્ધકામા લબ્ધધીર્લબ્ધમઙ્ગલા ॥ ૧૫૯ ॥

લબ્ધવીર્યા લબ્ધવૃતા લાભા લબ્ધવિનાશિની ।
લસદ્વસ્ત્રા લસત્પીડા લસન્માલ્યા લસત્પ્રભા ॥ ૧૬૦ ॥

શૂલહસ્તા શૂરસેવ્યા શૂલિની શૂલનાશિની ।
શૂઙ્કૃત્યનુમતિઃ શૂર્પશોભના શૂર્પધારિણી ॥ ૧૬૧ ॥

શૂલસ્થા શૂરચિત્તસ્થા શૂલા શુક્લસુરાર્ચિતા ।
શુક્લપદ્માસનારૂઢા શુક્લા શુક્લામ્બરાંશુકા ॥ ૧૬૨ ॥

શુકલાલિતહસ્તાબ્જા શ્વેતા શુકનુતા શુભા ।
લલિતાક્ષરમન્ત્રસ્થા લિપ્તકુઙ્કુમભાસુરા ॥ ૧૬૩ ॥

લિપિરૂપા લિપ્તભસ્મા લિપ્તચન્દનપઙ્કિલા ।
લીલાભાષણસંલોલા લીનકસ્તૂરિકાદ્રવા ॥ ૧૬૪ ॥

લિખિતામ્બુજચક્રસ્થા લિખ્યાલિખિતવૈભવા ।
નીલાલકા નીતિમતી નીતિશાસ્ત્રસ્વરૂપિણી ॥ ૧૬૫ ॥

નીચઘ્ની નિષ્કલા નિત્યા નીલકણ્ઠપ્રિયાઙ્ગના ।

નિરાશા નિર્ગુણાતીતા નિર્મદા નિરુપપ્લવા ॥ ૧૬૬॥

નિર્ણીતા નિર્મલા નિષ્ઠા નિરઙ્કુશપરાક્રમા ।
નિર્વિણ્ણદાનવબલા નિશ્શેષીકૃતતારકા ॥ ૧૬૭॥

નિરઞ્જનકરામન્ત્રી નિર્વિઘ્નપરનાશિની ।
નિત્યક્લિન્ના નિરાહારા નીવીનીલામ્બરાઞ્ચિતા ॥ ૧૬૮॥

નિશાકરકુલધ્વંસી નિત્યાનન્દપરમ્પરા ।
નિમ્બપ્રિયા નિરાવેશા નિન્દિ તાસુરસુન્દરી ॥ ૧૬૯॥

નિર્ઘોષા નિગલાકૃષ્ટકૃત્તિજ્જ્વાલાવૃતાઙ્ગણા ।
નીરસા નિત્યકલ્યાણી નિરન્તરસુખપ્રદા ॥ ૧૭૦॥

નિર્લોભા નીતિમત્પ્રીતા નિર્વિઘ્ના નિમિષાપહા ।
દુમ્બીજા દુષ્ટસંહારી દુર્મદા દુરિતાપહા ॥ ૧૭૧॥

દુરુત્સહમહાવીર્યા દુર્મેધોત્સવનાશિની ।
દુર્માંસભક્ષિણી દુષ્ટા દૂરીકૃતનિશાચરા ॥ ૧૭૨॥

દૂતી દુષ્ટગ્રહમદચુમ્બી દુર્બલરક્ષકી ।
ષ્ટઙ્કારી ષ્ટમ્મયી ષ્ટમ્ભા ષ્ટમ્બીજા ષ્ટમ્ભકીલકા ॥ ૧૭૩॥

ગ્રહેશ્વરી ગ્રહારાધ્યા ગ્રહણીરોગમોચિની ।
ગ્રહાવેશકરી ગ્રાહ્યા ગ્રહગ્રામાભિરક્ષિણી ॥ ૧૭૪॥

ગ્રામૌષધમહાવીર્યા ગ્રામ્યસર્વભયાપહા ।
ગ્રહદ્વેષી ગ્રહારૂઢા ગ્રામણીર્ગ્રામદેવતા ॥ ૧૭૫॥

ગૃહીતબ્રહ્મમુખ્યાસ્ત્રા ગૃહીતાયુધશક્તિદા ।
ગ્રાસમાંસા ગૃહસ્થાર્ચ્યા ગ્રહભૂતનિવારિણી ॥ ૧૭૬॥

હમ્ભૂતા હલધૃક્સેવ્યા હારહારિકુચાઞ્ચલા ।
હર્ષપ્રદા હરારાધ્યા હાસનિન્દ્યનિશાકરા ॥ ૧૭૭॥

હવિર્ભોક્ત્રી હરિદ્રાભા હરિતાશ્વાધિરોહિણી ।
હરિત્પતિસમારાધ્યા હલાકૃષ્ટસુરાસુરા ॥ ૧૭૮॥

હારીતશુકવત્પાણિઃ હયમેધાભિરક્ષકી ।
હંસાક્ષરી હંસબીજા હાહાકારહરાશુગા ॥ ૧૭૯॥

હય્યઙ્ગવીનહૃદ્વૃત્તિઃ હારીતાંશુમણિદ્યુતિઃ ।
હુઙ્કારાત્મા હુતાહોમ્યા હુઙ્કારાલયનાયિકા ॥ ૧૮૦॥

હુઙ્કારપઞ્જરશુકી હુઙ્કારકમલેન્દિરા ।
હુઙ્કારરાત્રિકાજ્યોત્સ્ના હુઙ્કારદ્રુમમઞ્જરી ॥ ૧૮૧॥

હુઙ્કારદીપિકાજ્વાલા હુઙ્કારાર્ણવકૌમુદી ।
હુમ્ફટ્કરી હુમ્ફટ્દ્યુતિઃ હુઙ્કારાકાશભાસ્કરા ॥ ૧૮૨॥

ફટ્કારી સ્ફાટિકાકારા સ્ફટિકાક્ષકરામ્બુજા ।
ફટ્કીલકા ફડસ્ત્રા ચ ફટ્કારાહિશિખામણિઃ ॥ ૧૮૩॥

ફટ્કારસુમનોમાધ્વી ફટ્કારકમલેન્દિરા ।
ફટ્કારસૌધશ ૃઙ્ગસ્થા ફટ્કારાધ્વરદક્ષિણા ॥ ૧૮૪॥

ફટ્કારશુક્તિકામુક્તા ફટ્કારદ્રુમમઞ્જરી ।
ફટ્કારવીરખડ્ગાસ્ત્રા ફટ્કારતનુમધ્યગા ॥ ૧૮૫॥

ફટ્કારશિબિકારૂઢા ફટ્કારચ્છત્રલાઞ્છિતા ।
ફટ્કારપીઠનિલયા ફટ્કારાવૃતમણ્ડલા ॥ ૧૮૬॥

ફટ્કારકુઞ્જરમદપ્રવાહા ભાલલોચના ।
ફલાશિની ફલકરી ફલદાનપરાયણા ॥ ૧૮૭॥

ફટ્કારાસ્ત્રફલાકારા ફલન્તી ફલવર્જિતા ।
સ્વાતન્ત્ર્યચરિતા સ્વસ્થા સ્વપ્નગ્રહનિષૂદિની ॥ ૧૮૮॥

સ્વાધિષ્ઠાનામ્બુજારૂઢા સ્વયમ્ભૂતા સ્વરાત્મિકા ।
સ્વર્ગાધિપા સ્વર્ણવર્ણા સ્વાહાકારસ્વરૂપિણી ॥ ૧૮૯॥

સ્વયંવરા સ્વરારોહા સ્વપ્રકાશા સ્વરપ્રિયા ।
સ્વચક્રરાજનિલયા સ્વસૈન્યવિજયપ્રદા ॥ ૧૯૦॥

સ્વપ્રધાના સ્વાપકારી સ્વકૃતાખિલવૈભવા ।
સ્વૈરિણી ખેદશમની સ્વરૂપજિતમોહિની ॥ ૧૯૧॥

હાનોપાદાનનિર્મુક્તા હાનિદૌઘનિરાસના ।
હસ્તિકુમ્ભદ્વયકુચા હસ્તિરાજાધિરોહિણી ॥ ૧૯૨॥

હયગ્રીવસમારાધ્યા હસ્તિકૃત્તિપ્રિયાઙ્ગના ।
હાલીકૃતસ્વરકુલા હાનિવૃદ્ધિવિવર્જિતા ॥ ૧૯૩॥

હાહાહૂહૂમુખસ્તુત્યા હઠદાનિતકૃત્તિકા ।
હતાસુરા હતદ્વેષા હાટકાદ્રિગુહાગૃહા ॥ ૧૯૪॥

હલ્લીનટનસન્તુષ્ટા હરિગહ્વરવલ્લભા ।
હનુમદ્ગીતસઙ્ગીતહાસિતા હરિસોદરી ॥ ૧૯૫॥

હકારકન્દરાસિંહી હકારકુસુમાસવા ।
હકારતટિનીપૂરા હકારજલપઙ્કજા ॥ ૧૯૬॥

હકારયામિની જ્યોત્સ્ના હકારખજિતારસા ।
હકારચક્રવાલાર્કા હકારમરુદીધિતિઃ ॥ ૧૯૭॥

હકારવાસરઙ્ગી ચ હકારગિરિનિર્ઝરા ।
હકારમધુમાધુર્યા હકારાશ્રમતાપસી ॥ ૧૯૮॥

હકારમધુવાસન્તી હકારસ્વરકાહલી ।
હકારમન્ત્રબીજાર્ણા હકારપટહધ્વનિઃ ॥ ૧૯૯॥

હકારનારીલાવણ્યા હકારપરદેવતા ॥ ૨૦૦॥

નમો વેદાન્તરૂપાયૈ દુર્ગાદેવ્યૈ નમો નમઃ ।
નમો ભક્તાનુકમ્પાયૈ દુર્ગે શ્રીપરદેવતે ॥

નમો નમો ભગવતિ ત્રાહિ મામપરાધિનમ્ ॥

સર્વપાપાપહં મુખ્યં સર્વમઙ્ગલદાયકમ્ ।
સર્વસમ્પત્કરં પુણ્યં સ્વર્ગમોક્ષસુખપ્રદમ્ ॥

પઠતાં શ‍ૃણ્વતાં ચાત્ર પુત્રપૌત્રપ્રદં શુભમ્ ।
સહસ્રનામકં શ્રેષ્ઠં દુર્ગાયાઃ કામદં પરમ્ ॥

ઇતિ શ્રીદુર્ગાસહસ્રનામસ્તોત્રં સમ્પૂર્ણમ્ ॥

Proofread by PSA Easwaran

*shrIdurgAsahasranAmastotram*

pdf was typeset on February 3, 2023

Please send corrections to *sanskrit@cheerful.com*